**2.** गद्यांशेषु रेखाङ्कितानां **पञ्चानां** पदानां हिन्द्यामर्थो लेख्य:। 10

**3.** रघुवीरसिंहस्य यात्रा वर्णनं लिखत। 15

**अथवा**

प्रथमनि:श्वासस्य सारांशोवर्णनीय:।

**4.** गद्यं कवीनां निकषं वदन्तीति सूक्तिं विशदयत । 15

**अथवा**

अम्बिकादत्तव्यासस्य गद्यलेखनवैशिष्ट्यं विवेचयत।



मुद्रित पृष्ठ : 4 अनुक्रमांक ......................

**स/20**

# प्रवेशिका ( प्रथम वर्ष ) परीक्षा, 2015

## साहित्य

## ( विशिष्ट विषय )

## षष्ठम् प्रश्नपत्रम्

***समय: - घंटात्रयम्*** ***पूर्णाङ्का: - 100***

***( प्रश्नपत्रप्राप्तिसमनन्तरमेव अस्योपरि स्वीयोऽनुक्रमाङ्क: लेख्य: )***

**1.** निम्नलिखितेषु गद्यखण्डेषु सप्रसङ्गं गद्यांश**त्रयं** व्याख्येयम् ।

20×3=60

(क) अरुण एष प्रकाश: पूर्वस्यां भगवतो मरीचिमालिन:। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचर चक्रस्य, कुण्डलमाखण्डल दिश:, दीपको ब्रह्माण्डभाण्डस्य प्रेयान पुण्डरीकपटलस्य, शोक विमोक: कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधार: सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम् , एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता: युगभेदा:।

(ख) इतस्तु स्वतन्त्रयवनकुलभुज्यमानविजयपुराधीशप्रेषित:, पुण्यनगरस्य समीप एव प्रक्षालित गण्ड शैलमण्डलाया:,निर्झरवारिधारापूरपूरितप्रबलप्रवाहाया:, पश्चिमपारावारप्रान्तप्रसूतगिरिग्रामगुहागर्भ निर्गताया अपि प्राच्यपयोनिधि चुम्बन चञ्चुराया:, रिङ्गत्तरङ्गभङ्गोद्धावर्त्तशतभीमाया: भीमाया: नद्या अनवरतनिपतद्वकुलकुलकुसुमकदम्ब सुरभीकृतमपि नीरं वगा हमानमत्तमतङ्गजमदधारामि: कद्रू कुर्वन हयहेषाध्वनि बधिरीकृतगण्यूतिमध्यगाध्वनीनवर्ग: सेनानीफजलखान: ससेनस्तिष्ठतिस्म।

(ग) तच पर्णकुटीरे तु कथं कथमपि दाडिमाद्यास्वादनतत्परां कुसुम गुच्छैर्मनोविनोदयन्तीं बालिकां गुरो: समीपे परित्यज्य तदाज्ञया तत्पितरौ समन्वेष्टुम, अन्तर्गोपितक्षुरप्रच्छुरिकां यष्टिकामेकां हस्तेन धृत्वा, तैरेव श्याम श्यामै: गुच्छगुच्छै लोललोलै: कुञ्चितकुञ्चितै: कचै: ब्रह्मचारि बटुवेष एव श्याम बटु रासन्नग्रामटिकादिशि समगात् । ततो हन्त! कथमद्यापि शूली, त्रिशूलेन नैतान् शूलाकरोति, कथं खङ्गिनी खङ्गेन न खण्डयति, कथं चक्री चक्रेण न चूर्णयति, कथं पाशी पाशैर्न पाशयति।





(घ) मासोऽयमाषाढ:, अस्ति च सायं समय:, अस्तं जिगमिषुर्भगवान् भास्कर:, सिन्दूरद्रवस्नातानामिव वरुणदिगवलम्बिनामरुणवारिवाहानामभ्यन्तरं प्रविष्ट:। कलविङ्काश्चाटकैररुतै: परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते। वनानि प्रतिक्षणमधिकाधिकां श्यामतां कलयन्ति। अथाकस्मात्परितो मेघमाला पर्वत श्रेणीव प्रादुरभूत् । क्षणं सूक्ष्मविस्तारा, परत: प्रकटितशिखरि शिखरविडम्बना समस्तं गगन तलं पर्यच्छदीत् ।

(ङ) महात्मन् क्वाधुना विक्रमराज्यम् ? वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश-शत-कानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जयजय ध्वनिः? क्व सम्प्रति तीर्थे-तीर्थे घण्टानादः? क्वाद्या-पि मठे-मठे वेदघोषः? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्टवा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते। क्वचिन्मंदिराणि भिद्यन्ते क्वचिन्तुलसीव नानि छिद्यन्ते, क्वचिछारा: अपहृियन्ते क्वचिद्धनानि लुण्ठयन्ते ।